मृद्वीकार्द्धशतं त्रिंशत्पिप्पलीः शर्करापलम्।
लेहयेन्मधुना गोर्व्वा क्षीरपस्य शकृद्रसम्॥
त्वगेलाव्योषमृद्वीकापिप्पलीमूलपौष्करैः।
लाजमुस्ताशठीरास्नाधात्रीफलविभीतकैः॥
शर्कराक्षौद्रसर्पिर्भिर्लेहो हृद्रोगकासहा।
मधुरैर्जाङ्गलरसैर्यवश्यामाककोद्रवाः॥
मुद्गादियूषैः शाकैश्च तिक्तकैर्मात्रया हिताः।
घनश्लेष्माणि लेहाश्च तिक्ताश्च मधुसंयुताः॥
शालयः स्युस्तनुकफे षष्टिकाश्च रसादिभिः।
शर्कराम्भोऽनुपानार्थं द्राक्षेक्षुस्वरसाः पयः॥
काकोली बृहतीमेदाद्वयैः स वृषनागरैः।
पित्तकासे रसक्षीरपेयायूषान् प्रकल्पयेत्"॥
"पुनर्नवा शिवाटिका सरलकासमर्द्दामृता।
पटोलबृहतीफणिज्जकरसैः पयः संयुतैः॥
घृतं त्रिकटुना च सिद्धमुपयुज्य सञ्जायते।
न कासविषमज्वरक्षयगुदाङ्कुरेभ्यो भयम्"॥ *॥
"दशमूलं स्वयङ्गुप्तां शङ्खपुष्पीं शठीं बलाम्॥
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान्।
भार्गीं पुष्करमूलञ्च द्विपलांशान् यवाढकम्॥
हरीतकीशतञ्चैकं जलेपञ्चाढके पचेत्।
यवस्विन्ने कषायं तं पूतन्तच्चाभयाशतम्॥
पचेद्गुड़तुलां दत्त्वा कुड़वञ्च पृथग्घृतात्।
तैलात् सपिप्पलीचूर्णात् सिद्धशीते च माक्षिकात्॥
लेहं द्वे चाभये नित्यमतः खादेद्रसायनात्।
तद्वलीपलितं हन्याद्वर्णायुर्बलवर्द्धनम्॥
पञ्चकासान् क्षयं श्वासं सहिक्कं विषमज्वरम्।
मेहगुल्मग्रहण्यर्शहृद्रोगारुचिपीनसान्॥
अगस्तिविहितं धन्यमिदं श्रेष्ठं रसायनम्"॥

इति आगस्त्यरसायनम्॥ *॥

"विधिश्च यक्ष्मविहितो यथावस्थं क्षते हितः॥
निवृत्ते क्षतदोषे तु कफे वृद्धे उरः शिरः।
दाल्यते कासिनो यस्य सधूमानापिबेदिमान्॥
द्विमेदाद्विबलायष्टीकल्कैः क्षौमे सुभाविते।
वर्त्तिं कृत्वा पिबेद्धूमं जीवनीयघृतानुपः॥
मनःशिलापलाशाजगन्धात्वक्क्षीरिनागरैः।
तद्वदेवानुपानन्तु शर्करेक्षुगुड़ोदकम्॥
पिष्ट्वा मनःशिलां तुल्यां मार्द्रया वटशुङ्गया।
ससर्पिष्कां पिबेद्धूमं तित्तिरिप्रतिभोजनम्॥
क्षयजे बृंहणं पूर्वं कुर्य्यादग्नेश्च वर्द्धनम्।
बहुदोषाय सस्नेहं मृदुदद्याद्विरेचनम्॥
शम्याकेन त्रिवृतया मृद्वीकारसयुक्तया।
तिल्वकस्य कषायेण विदारीस्वरसेन च॥
सर्पिः सिद्धं पिबेद्युक्त्या क्षीणदेहो विशोधनम्।
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान्॥
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्।
विदारीभिः कदम्बैर्वा तालशस्यैश्च साधितम्॥
घृतं पयश्च मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे।
शूने सवेदने मेढ्रे पायौ सश्रोणिवङ्क्षणे॥
घृतमण्डेन लघुनानुवास्यो मिश्रकेण वा।
जाङ्गलैः प्रतिभुक्तस्य वर्त्तकाद्या बिलेशयाः॥
क्रमशः प्रसहास्तद्वत् प्रयोज्याः पिशिताशिनः।
औष्ण्यात्प्रमाथिभावाच्च स्रोतोभ्यश्च्यावयन्ति ते॥
कफं शुद्धैश्च तैःपुष्टिं कुर्य्यात्सम्यग्वहन् रसः।
चविकात्रिफलाभार्गीदशमूलैः सचित्रकैः॥
कुलत्थपिप्पलीमूलपाठाकोलयवैर्जले।
शृतैर्नागरदुस्पर्शापिप्पलीशठिपौष्करैः॥
पिष्टैः कर्कटशृङ्ग्या च समैः सर्पिर्विपाचयेत्।
सिद्धेऽस्मिंश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च॥
दत्त्वा युक्त्या पिबेन्मात्रां क्षयकासनिपीड़ितः।
कासमर्द्दाभयामुस्तापाठाकट्फलनागरैः॥
पिप्पल्या कटुरोहिण्या काश्मर्य्याः स्वरसेन च।
अक्षमात्रैर्घृतप्रस्थं क्षीरद्राक्षारसाढके॥
पचेच्छोषज्वरप्लीहसर्व्वकासहरं शिवम्"॥ *॥
"वृषव्याघ्रीगुडूचीनां पत्रमूलफलाङ्कुरान्॥
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुचीः"।
"स्युर्दोषबद्धः कण्ठोरः स्रोतसाञ्च विशुद्धये॥
प्रस्थोन्मिते यवक्वाथे विंशतिर्विजयाः पचेत्।
स्विन्ना मृदित्वा तास्तस्मिन् पुराणात् षट्पलं गुड़ात्॥
पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात्।
दत्त्वार्द्धाक्षं पचेद्भूयः स लेहः श्वासकासनुत्"॥
"तद्वन्मरिचचूर्णं वा सघृतक्षौद्रशर्करम्।
पथ्याशुण्ठीघनगुड़ैर्गुटिकां धारयेन्मुखे॥
सर्व्वेषु श्वासकासेषु केवलं वा विभीतकम्।
पत्रकल्कं घृतभृष्टं तिल्वकस्य सशर्करम्॥
पेयावोत्कारिकाच्छर्द्दितृट्कासामातिसारनुत्।
कण्टकारीरसे सिद्धो मुद्गयूषः सुसंस्कृतः॥
सगौरामलकः साम्लः सर्व्वकासभिषग्जितम्॥
वातघ्नौषधनिःक्वाथे क्षीरं यूषान् रसानपि।
वैष्किरान् प्रातुदान् बैलान् दापयेत् क्षयकासिने॥
क्षतकासे च ये धूमाः सानुपानानि दर्शिताः।
क्षयकासेऽपि ते योज्या वक्ष्यन्ते यच्च यक्ष्मणि॥
बृंहणं दीपनञ्चाग्नेः स्रोतसाञ्च विशोधनम्।
व्यत्यासात्क्षयकासिभ्यो बल्यं सर्व्वं प्रशस्यते॥
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः।
यथादोषबलन्तस्य सन्निपातहितं हितम्"॥
इति वाभटे चिकित्सास्थाने ३ अध्याये॥ *॥

अस्य सकारणसम्प्राप्तिकं लक्षणं चिकित्सितञ्च यथा,—
"तपसा यशसा धृत्या धिया च परयान्वितः।
आत्रेयः कासशान्त्यर्थं सिद्धं प्राह चिकित्सितम्॥
वातादिभिस्त्रयो ये च क्षतजः क्षयजस्तथा।
पञ्चैते स्युर्नृणां कासा वर्द्धमानाः क्षयप्रदाः"॥
"अधःप्रतिहतो वायुरूर्द्धस्रोतः समाश्रितः।
उदानभावमापन्नः कण्ठे सक्तस्तथोरसि॥
आविश्य शिरसः खानि सर्व्वाणि प्रति पूरयन्।
आभञ्जन्नाक्षिपन्देहं हनुमन्ये तथाक्षिणी॥
नेत्रे पृष्ठमुरः पार्श्वे निर्भज्य स्तम्भयंस्ततः।
शुष्को वा सकफो वापि कसनात् कास उच्यते।
प्रतिघातविशेषेण तस्य वायोः सरंहसः॥
वेदनाशब्दवैषम्यं कासानामुपजायते।
रूक्षशीतकषायाल्पप्रमितानशनं स्त्रियः॥
वेगधारणमायासो वातकासप्रवर्त्तकाः।
हृत्पार्श्वोरः शिरःशूलस्वरभेदकरो भृशम्॥
शुष्कोरःकण्ठवक्त्रास्यहृष्टलोम्नः प्रताम्यतः।
निर्घोषीस्तनतो दैन्यदौर्ब्बल्यक्षयमोहकृत्॥
शुष्ककासः कफं शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्रजेत्।
स्निग्धाम्ललवणोष्णैश्च भुक्तमात्रे प्रशाम्यति॥
ऊर्द्ध्ववातस्य जीर्णेऽन्ने वेगवान्मारुतो भवेत्।
कटुकोष्णविदाह्यम्लक्षाराणामतिसेवनम्॥
पित्तकासकरं क्रोधः सन्तापश्चाग्निसूर्य्यजः।
पीतनिष्ठीवनाक्षित्वं तिक्तास्यत्वं स्वरामयः॥
उरो धूमायनं तृष्णा दाहो मोहोऽरुचिर्भ्रमः।
प्रततं कासमानश्च ज्योतींषीव च पश्यति।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पैत्तिके॥
गुर्व्वभिष्यन्दिमधुरस्निग्धस्वप्नाविचेष्टनैः।
वृद्धः श्लेष्मानिलं रुद्ध्वा कफकासं करोति हि॥
मन्दाग्नित्वारुचिच्छर्द्दिपीनसोत्क्लेशगौरवैः।
लोमहर्षास्यमाधुर्य्यक्लेदसंसदनैर्युतम्॥
बृंहणं मधुरं स्निग्धं निष्ठीवति घनं कफम्।
कासमानोऽतिरुग्वक्षः सम्पूर्णमिव मन्यते"॥
"दुर्गन्धं हरितं रक्तं ष्ठीवेत् पूयोपमं कफम्।
स्थानादुत्कासमानश्च हृदयं मन्यते च्युतम्॥
अकस्मादुष्णशीतार्त्तो बह्वाशी दुर्ब्बलः कृशः।
स्निग्धाच्छमुखवर्णत्वक् श्रीमद्दर्शनलोचनः॥
पाणिपादतलौ श्लक्ष्णौ सततासूयकोष्णौ।
ज्वरो मिश्राकृतिस्तस्य पार्श्वरुक् पीनसोऽरुचिः॥
भिन्नसङ्घातवर्च्चस्त्वं स्वरभेदोऽनिमित्ततः।
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः"॥
"रूक्षस्यानिलजं कासं आदौ स्नेहैरुपाचरेत्।
सर्पिर्भिर्वस्तिभिः पेयायूषक्षीररसादिभिः।
वातघ्नसिद्धैः स्नेहाद्यैर्धूमैर्लेहैश्च युक्तितः॥
अभ्यङ्गैः परिषेकैश्च स्निग्धैः स्वेदैश्च बुद्धिमान्।
वस्तिभिर्बद्धविड्वातं शुष्कोर्द्धं चोर्द्ध्वभक्तिकैः॥
घृतैः सपित्तं सकफं जयेत् स्नेहविरेचनैः"।
"पिप्पली पिप्पलीमूलचव्यचित्रकनागरैः।
धान्यपाठावचारास्नायष्ट्याह्वक्षारहिङ्गुभिः।
कोलमात्रैर्घृतप्रस्थाद्दशमूली रसाढ़के॥
सिद्धां चतुर्थिकां पीत्वा पेयामण्डं पिबेदनु।
तच्छ्वासकासहृत्पार्श्वग्रहणीदोषगुल्मनुत्"॥
"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्य्याणि परूषकम्।
द्वे पाटे सरलं व्याघ्रीं स्वगुप्ताचित्रकं शठीम्।
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम्।
त्रिकण्टकां विदारीञ्च पिष्ट्वा कर्षसमं घृतात्॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत्।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत्॥
कामलार्शोऽनिलाष्ठीलाक्षतशोषक्षयापहम्।
त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम्"॥

इति त्र्यूषणाद्यं घृतम्॥ *॥

"द्रोणेऽपां साधयेद्रास्नां दशमूलीं शतावरीम्।
पलिकां माषिकांशांस्तु कुलत्थान् वदरान् यवान्॥
तुलार्द्धञ्चाजमांसस्य पादशेषेण तेन च।
घृताढकं समक्षीरं जीवनीयैः पलोन्मितैः॥
सिद्धं तद्दशभिः कल्कैः नस्यपानानुवासनैः।
समीक्ष्य वातरोगेषु यथावस्थं प्रयोजयेत्॥
पञ्च कासान् शिरःकम्पं शूलं वङ्क्षणयोनिजम्।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्द्ध्वानिलान् जयेत्"॥